# Annapurna Stotram

### यी पाठहरूका बारेमा

| | |
|---|---|
| स्रोतहरू | हरेक पाठ आफ्नो स्रोत, परम्परा र संस्करणसहित छापिएको छ। अन्य परम्परा र संस्करणहरूमा शब्दमा थोरै फरक हुन सक्छ। |
| लिप्यन्तरण | रोमन पङ्क्ति देवनागरीबाट बनाइएको IAST लिप्यन्तरण हो (ā = दीर्घ आ, ṃ = अनुस्वार, ḥ = विसर्ग, ś/ṣ = श/ष, c = च)। हिन्दी, अवधी र ब्रज पाठहरूमा शब्दको अन्त्यको उच्चारण नहुने "a" लेखिँदैन। लिप्यन्तरणमा वैदिक स्वर देखिँदैनन्। |

## Annapurna Stotram

| | |
|---|---|
| प्रकार | स्तोत्र |
| देवता | Annapurna |
| संस्करण | Verified text |
| परम्परा | शाक्त |
| स्रोत | The Works of Sri Sankaracharya, vol. 18 — Sri Vani Vilas Press, Srirangam — Vol. 18, pages 75–78 |
| आभार | Text: The Works of Sri Sankaracharya, vol. 18 (Sri Vani Vilas Press, Srirangam), via Sanskrit Wikisource contributors (CC BY-SA 4.0). Summary and meaning: Udyog Jyotish editorial team. |
| प्रतिलिपि अधिकार | Text in the public domain. Transcription from Sanskrit Wikisource, CC BY-SA 4.0. |

नित्यानन्दकरी वराभयकरी सौन्दर्यरत्नाकरी निर्धूताखिलघोरपावनकरी प्रत्यक्षमाहेश्वरी ।

nityānandakarī varābhayakarī saundaryaratnākarī nirdhūtākhilaghorapāvanakarī pratyakṣamāheśvarī |

प्रालेयाचलवंशपावनकरी काशीपुराधीश्वरी भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ १ ॥

prāleyācalavaṃśapāvanakarī kāśīpurādhīśvarī bhikṣāṃ dehi kṛpāvalambanakarī mātānnapūrṇeśvarī || 1 ||

नानारत्नविचित्रभूषणकरी हेमाम्बराडम्बरी मुक्ताहारविलम्बमानविलसद्वक्षोजकुम्भान्तरी ।

nānāratnavicitrabhūṣaṇakarī hemāmbarāḍambarī muktāhāravilambamānavilasadvakṣojakumbhāntarī |

काश्मीरागरुवासिताङ्गरुचिरे काशीपुराधीश्वरी भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ २ ॥

kāśmīrāgaruvāsitāṅgarucire kāśīpurādhīśvarī bhikṣāṃ dehi kṛpāvalambanakarī mātānnapūrṇeśvarī || 2 ||

योगानन्दकरी रिपुक्षयकरी धर्मैकनिष्ठाकरी चन्द्रार्कानलभासमानलहरी त्रैलोक्यरक्षाकरी ।

yogānandakarī ripukṣayakarī dharmaikaniṣṭhākarī candrārkānalabhāsamānalaharī trailokyarakṣākarī |

सर्वैश्वर्यकरी तपः फलकरी काशीपुराधीश्वरी भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ ३ ॥

sarvaiśvaryakarī tapaḥ phalakarī kāśīpurādhīśvarī bhikṣāṃ dehi kṛpāvalambanakarī mātānnapūrṇeśvarī || 3 ||

कैलासाचलकन्दरालयकरी गौरी ह्युमाशङ्करी कौमारी निगमार्थगोचरकरी ह्योंकारबीजाक्षरी ।

kailāsācalakandarālayakarī gaurī hyumāśaṅkarī kaumārī nigamārthagocarakarī hyoṃkārabījākṣarī |

मोक्षद्वारकवाटपाटनकरी काशीपुराधीश्वरी भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ ४ ॥

mokṣadvārakavāṭapāṭanakarī kāśīpurādhīśvarī bhikṣāṃ dehi kṛpāvalambanakarī mātānnapūrṇeśvarī || 4 ||

दृश्यादृश्यविभूतिवाहनकरी ब्रह्माण्डभाण्डोदरी लीलानाटकसूत्रखेलनकरी विज्ञानदीपाङ्कुरी ।

dṛśyādṛśyavibhūtivāhanakarī brahmāṇḍabhāṇḍodarī līlānāṭakasūtrakhelanakarī vijñānadīpāṅkurī |

श्रीविश्वेशमनःप्रसादनकरी काशीपुराधीश्वरी भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ ५ ॥

śrīviśveśamanaḥprasādanakarī kāśīpurādhīśvarī bhikṣāṃ dehi kṛpāvalambanakarī mātānnapūrṇeśvarī || 5 ||

आदिक्षान्तसमस्तवर्णनकरी शंभुप्रिया शाङ्करी काश्मीरत्रिपुरेश्वरी त्रिनयनी विश्वेश्वरी शर्वरी ।

ādikṣāntasamastavarṇanakarī śaṃbhupriyā śāṅkarī kāśmīratripureśvarī trinayanī viśveśvarī śarvarī |


स्रोतसहितका परम्परागत पाठहरू। कुनै निश्चित परिणामको दाबी गरिएको छैन।

स्वर्गद्वारकवाटपाटनकरी काशीपुराधीश्वरी भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ ६ ॥

svargadvārakavāṭapāṭanakarī kāśīpurādhīśvarī bhikṣāṃ dehi kṛpāvalambanakarī mātānnapūrṇeśvarī || 6 ||

उर्वीसर्वजनेश्वरी जयकरी माता कृपासागरी । नारीनीलसमानकुन्तलधरी नित्यान्नदानेश्वरी।

urvīsarvajaneśvarī jayakarī mātā kṛpāsāgarī | nārīnīlasamānakuntaladharī nityānnadāneśvarī|

साक्षान्मोक्षकरी सदा शुभकरी काशीपुराधीश्वरी भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ ७ ॥

sākṣānmokṣakarī sadā śubhakarī kāśīpurādhīśvarī bhikṣāṃ dehi kṛpāvalambanakarī mātānnapūrṇeśvarī || 7 ||

देवी सर्वविचित्ररत्नरचिता दाक्षायणी सुन्दरी वामा स्वादुपयोधरा प्रियकरी सौभाग्यमाहेश्वरी ।

devī sarvavicitraratnaracitā dākṣāyaṇī sundarī vāmā svādupayodharā priyakarī saubhāgyamāheśvarī |

भक्ताभीष्टकरी सदा शुभकरी काशीपुराधीश्वरी भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ ८ ॥

bhaktābhīṣṭakarī sadā śubhakarī kāśīpurādhīśvarī bhikṣāṃ dehi kṛpāvalambanakarī mātānnapūrṇeśvarī || 8 ||

चन्द्रार्कानलकोटिकोटिसदृशी चन्द्रांशुबिम्बाधरी चन्द्रार्काग्निसमानकुण्डलधरी चन्द्रार्कवर्णेश्वरी ।

candrārkānalakoṭikoṭisadṛśī candrāṃśubimbādharī candrārkāgnisamānakuṇḍaladharī candrārkavarṇeśvarī |

मालापुस्तकपाशसाङ्कुशधरी काशीपुराधीश्वरी भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ ९ ॥

mālāpustakapāśasāṅkuśadharī kāśīpurādhīśvarī bhikṣāṃ dehi kṛpāvalambanakarī mātānnapūrṇeśvarī || 9 ||

क्षत्रत्राणकरी महाभयहरी माता कृपासागरी सर्वानन्दकरी सदा शिवकरी विश्वेश्वरी श्रीधरी ।

kṣatratrāṇakarī mahābhayaharī mātā kṛpāsāgarī sarvānandakarī sadā śivakarī viśveśvarī śrīdharī |

दक्षाक्रन्दकरी निरामयकरी काशीपुराधीश्वरी भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ १० ॥

dakṣākrandakarī nirāmayakarī kāśīpurādhīśvarī bhikṣāṃ dehi kṛpāvalambanakarī mātānnapūrṇeśvarī || 10 ||

अन्नपूर्णे सदापूर्णे शङ्करप्राणवल्लभे ।

annapūrṇe sadāpūrṇe śaṅkaraprāṇavallabhe |

ज्ञानवैराग्यसिध्यर्थं भिक्षां देहि च पार्वति ॥ ११ ॥

jñānavairāgyasidhyarthaṃ bhikṣāṃ dehi ca pārvati || 11 ||

माता च पार्वतीदेवी पिता देवो महेश्वरः ।

mātā ca pārvatīdevī pitā devo maheśvaraḥ |

बान्धवाः शिवभक्ताश्च स्वदेशो भुवनत्रयम् ॥ १२ ॥

bāndhavāḥ śivabhaktāśca svadeśo bhuvanatrayam || 12 ||

## अर्थ

Annapurna is described as the queen of Kashi who gives joy and fearlessness, adorned with jewels and gold, protector of the three worlds, Gauri and Uma, the seed-syllable Om, opener of the door to liberation. Each verse asks her, as a mendicant asks, for alms given out of grace. The two closing verses ask Parvati, ever full, for the alms of knowledge and detachment, and say that the Goddess is mother, Shiva is father, devotees of Shiva are kin, and the three worlds are home.


स्रोतसहितका परम्परागत पाठहरू। कुनै निश्चित परिणामको दाबी गरिएको छैन।

## यस कागजातका बारेमा

यस कागजातका पाठहरू सार्वजनिक (पब्लिक डोमेन) परम्परागत भक्ति पाठ हुन् वा हाम्रो टोलीले लेखेका हुन्, र आफ्नो अभिलेखित स्रोत र संस्करणसहित छापिएका छन्।

अर्थहरू हाम्रै शब्दमा छोटा व्याख्या हुन्, विद्वत्तापूर्ण अनुवाद होइनन्। कुनै पाठका आफ्नै श्लोकमा बताइएका लाभ पाठका अंश हुन्, ग्यारेन्टी होइनन्।

केही साधना परम्परागत रूपमा गुरुको मार्गदर्शनमा गरिन्छन्। आफ्नो परम्पराको मार्गदर्शन पालना गर्नुहोस्।